श्रीकुमारीबन्धनम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीकुमारीवन्दनम्

दक्षिणद्वीपे एवंगृहविवासितेन चैलकभिक्षुसिंहरत्नेन संगृहीतम् ।
कान्तिपुरमहानगरे श्रीकाशीनाथतमोटसहकृतं मुद्रितम् ॥

Śrīkumārīvandanam: Praises to the Blessed Kumari in Sanskrit.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नेसं ११३४ चौलाथ्व ८
यँ, नेपाल
7 April, 2014
Kathmandu, Nepal

मञ्जु प्रकाशन, ४०/–
Manju Publications, 40/-
मुद्रक : लुष प्रेस, नयाँबानेश्वर, काठमाडौं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CONTENTS

श्रीकुमारीस्तोत्रम् Śrīkumārī-stotram
(Praise to Blessed kumārī) 2

वज्रविलासिन्याष्टकम् Vajravilāsiny-āṣṭakam
(Eight Verses on Vajravilāsinī) 6

चण्डिकादण्डकस्तोत्रम् Caṇḍikādaṇḍakastotram
(Little Chandi's Truncheon) 8

वज्रयोगिनीविशुद्धिस्तोत्रम् Vajrayoginīviśuddhistotram
(The Clarification of Vajrayoginī) 12

श्रीवज्रवाराहीद्वादशकम् Śrīvajravārāhīdvādaśakam
(Twelve verses on Blessed Vajravārāhī) 16

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीकुमारीस्तोत्रम्

१ नमः श्रीकुमार्यै ।

बालभावे महारौद्री कौमारी रक्तलोचनी ।
रक्तवस्त्रपरीधानी सिन्दुरारुणविग्रहा ॥
चतुर्भुजा शक्तिहस्ता सिद्धिपात्रधरा शुभा ॥ १ ॥

कुमारीं परमां शक्ति-देवी मयूरवाहनी ।
क्रोधा पुण्यमहाक्षेत्रे वटवृक्षे निवासिनी ॥
याम्यपीठस्थिता नित्य कौमारी प्रणमाम्यहम् ॥ २ ॥

प्रभाते बालकौमारी मध्याह्ने तारुनीप्रभा ।
संध्याया वृद्धिरूपी च कौमारी प्रणमाम्यहम् ॥ ३ ॥

दहनी अरुणा चण्ड़ी शबरी सर्वमातृका ।
कृतान्तत्रासनी भीमा कौमारी प्रणमाम्यहम् ॥ ४ ॥

शुद्धरुपी महातेजा रक्तवर्ण प्रभावकारी ।
चिन्तामणिधरी देवी कौमारी प्रणमाम्यहम् ॥ ५ ॥

वागीश्वरी महाशान्तिगोत्री धात्री धनंददा ।
स्त्रीरुपधारणी सिद्धा कौमारी प्रणमाम्यहम् ॥ ६ ॥

रक्तवर्णा सुधारुपा कोटिसूर्यसमप्रभा ।
सर्वशत्रुनिहन्ता च कौमारी प्रणमाम्यहम् ॥ ७ ॥

देवी भवानी माता प्रज्ञारुपेण संस्थिता ।
महामोक्षा धीमादेवी कौमारी प्रणमाम्यहम् ॥ ८ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

Śrī-kumārī-stotram

ʔ namaḥ śrīkumāryai |

bālabhāve mahāraudrī kaumārī raktalocanī |
raktavastraparīdhānī sindurāruṇavigrahā ||
caturbhujā śaktihastā siddhipātradharā śubhā || 1 ||

kumārīṃ paramāṃ śakti-devī mayūravāhanī |
krodhā puṇyamahākṣetre vaṭavṛkṣe nivāsinī ||
yāmyapīṭhasthitā nitya kaumārī praṇamāmy aham || 2 ||

prabhāte bālakaumārī madhyāhne tārunīprabhā |
saṃdhyāyā vṛddhirūpī ca kaumārī praṇamāmy aham || 3 ||

dahanī aruṇā caṇḍī śabarī sarvamātṛkā |
kṛtāntatrāsanī bhīmā kaumārī praṇamāmy aham || 4 ||

śuddharupī mahātejā raktavarṇa prabhāvakārī |
cintāmaṇidharī devī kaumārī praṇamāmy aham || 5 ||

vāgīśvarī mahāśāntigotrī dhātrī dhanaṃdadā |
strīrupadhāraṇī siddhā kaumārī praṇamāmy aham || 6 ||

raktavarṇā sudhārupā koṭisūryasamaprabhā |
sarvaśatrunihantā ca kaumārī praṇamāmy aham || 7 ||

devī bhavānī mātā prajñārupeṇa saṃsthitā |
mahāmokṣā dhīmādevī kaumārī praṇamāmy aham || 8 ||

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सङ्ग्रामे विजयीमाता राज्यलक्ष्मी ददाति च ।
महामायावतीदेवी कौमारी प्रणमाम्यहम् ॥ ९ ॥

राज्यलक्ष्मी महादेवी सर्वशोकनिवारिणी ।
सर्वकामप्रदादेवी कौमारी प्रणमाम्यहम् ॥ १० ॥

महासुखेश्वरी देवी अम्भोजा नन्दचारिणी ।
योगपीठेश्वरी देवी कौमारी प्रणमाम्यहम् ॥ ११ ॥

बन्धुकपुष्पसङ्काशा शान्तरुपी जिनेश्वरी ।
ऋद्धिसिद्धिप्रदादेवी कौमारी प्रणमाम्यहम् ॥ १२ ॥

कौमारी रक्तवर्णाभा भावकारीसमप्रभा ।
स्वायुधातु विन्दुपात्र कौमारी प्रणमाम्यहम् ॥ १३ ॥

मोक्षप्रदायिनी देवी मोहिनी सुरसुन्दरी ।
भक्तरक्षाकरी देवी कौमारी प्रणमाम्यहम् ॥ १४ ॥

जृम्भिनीस्तम्भिनीसिद्धी मोहिन्या कर्मणिस्तथा ।
सर्वमर्ककरीसिद्धी कौमारी प्रणमाम्यहम् ॥ १५ ॥

प्राणेश्वरी गृह्यमाता हारिणी दुःखतारिणी ।
मनोरथप्रदादेवी कौमारी प्रणमाम्यहम् ॥ १६ ॥

इति श्रीकुमारीस्तोत्रं सम्पूर्णम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

saṅgrāme vijayīmātā rājyalakṣmī dadāti ca |
mahāmāyāvatīdevī kaumārī praṇamāmy aham || 9 ||

rājyalakṣmī mahādevī sarvaśokanivāriṇī |
sarvakāmapradādevī kaumārī praṇamāmy aham || 10 ||

mahāsukheśvarī devī ambhojā nandacāriṇī |
yogapīṭheśvarī devī kaumārī praṇamāmy aham || 11 ||

bandhukapuṣpasaṅkāśā śāntarupī jineśvarī |
ṛddhisiddhipradādevī kaumārī praṇamāmy aham || 12 ||

kaumārī raktavarṇābhā bhāvakārīsamaprabhā |
svāyudhātu vindupātra kaumārī praṇamāmy aham || 13 ||

mokṣapradāyinī devī mohinī surasundarī |
bhaktarakṣākarī devī kaumārī pranamāmy aham || 14 ||

jrmbhinīstambhinīsiddhī mohinyā karmanis tathā |
sarvamarkakarīsiddhī kaumārī praṇamāmy aham || 15 ||

prāṇeśvarī gṛhyamātā hāriṇī duḥkhatāriṇī |
manorathapradādevī kaumārī praṇamāmy aham || 16 ||

iti śrīkumārīstotraṃ sampūrṇam ||

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वज्रविलासिन्याष्टकम्

१ नमः श्रीवज्रविलासिन्यै ।

नमामि वज्रवाराहीं सर्वपापप्रमोचनीम् ।
मारविध्वंसिनीं देवीं बुद्धत्वफलदायिनीम् ॥
वैरोचनकुलोद्भूतां मुक्तकेशीं त्रिलोचनाम् ।
संध्यासिन्दूरवर्णाभां वन्दे त्वां कुलिशेश्वरीम् ॥ १ ॥

पञ्चमुण्डशिरःशोभां स्कन्धे खट्वाङ्गधारिणीम् ।
करे वज्रकरोटस्थां वन्दे वज्रविलासिनीम् ॥ २ ॥

मुद्रापञ्चधरां देहे मुण्डमालाविभूषितां ।
लीलाहास्यमुखाम्भोजां वन्दे त्रैलोक्यसुन्दरीं ॥ ३ ॥

भैरवाद्यां त्रिमुखीं च विक्रान्तिकण्ठचर्चिकाम् ।
विध्वंसविघ्नघोरां च वन्दे भीमभयंकरीं ॥ ४ ॥

रागविरागयोर्मध्ये भावाभावविखण्डिताम् ।
समुद्भूतां सदा देवीं वन्दे तां ज्ञानडाकिनीम् ॥ ५ ॥

पञ्चामृतसुरापान-पञ्चशालिसुभोजिनीम् ।
गीतवाद्यरतां नित्यं वन्दे त्वां सुरवन्दिताम् ॥ ६ ॥

सदैवसहजानन्दं नित्यं भूतभवाश्रयाम् ।
रथचरणपूर्वां त्वां च वन्दे नृत्यपरायणाम् ॥ ७ ॥

त्वां देवि सिद्धिदात्रीं च योगाचारसदारताम् ।
बुद्धनिर्वाणदात्रीं त्वां वन्दे बुद्धस्य मातराम् ॥ ८ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

Vajravilāsiny-āṣṭakam

ʔ namaḥ śrīvajravilāsinyai |

namāmi vajravārāhīṃ sarvapāpapramocanīm |
māravidhvaṃsinīṃ devīṃ buddhatvaphaladāyinīm ||
vairocanakulodbhūtāṃ muktakeśīṃ trilocanām |
saṃdhyāsindūravarṇābhāṃ vande tvāṃ kuliśeśvarīm ||1||

pañcamuṇḍaśiraḥśobhāṃ skandhe khaṭvāṅgadhāriṇīm |
kare vajrakaroṭasthāṃ vande vajravilāsinīm || 2 ||

mudrāpañcadharāṃ dehe muṇḍamālāvibhūṣitāṃ |
līlāhāsyamukhāmbhojāṃ vande trailokyasundarīṃ || 3 ||

bhairavādyāṃ trimukhīṃ ca vikrāntikaṇṭhacarcikām |
vidhvaṃsavighnaghorāṃ ca vande bhīmabhayaṃkarīṃ ||4||

rāgavirāgayormadhye bhāvābhāvavikhaṇḍitām |
samudbhūtāṃ sadā devīṃ vande tāṃ jñānaḍākinīm || 5 ||

pañcāmṛtasurāpāna-pañcaśālisubhojinīm |
gītavādyaratāṃ nityaṃ vande tvāṃ suravanditām || 6 ||

sadaivasahajānandaṃ nityaṃ bhūtabhavāśrayām |
rathacaraṇapūrvāṃ tvāṃ ca vande nṛtyaparāyaṇām || 7 ||
tvāṃ devi siddhidātrīṃ ca yogācārasadāratām |
buddhanirvāṇadātrīṃ tvāṃ vande buddhasya mātarām ||8||

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चण्डिकादण्डकस्तोत्रम्

१ नमः श्रीचण्डिकायै ।

ऊं ऊं ऊं उग्रचण्डं चचकितचकितं चञ्चला दुर्गनेत्रं
हूँ हूँ हूंकाररूपं प्रहसितवदनं खड्गपाशान् धरन्तम् ।
दं दं दं दण्डपाणिं डमरुडिमिडिमां डण्डमानं भ्रमन्तं
भ्रं भ्रं भ्रं भ्रान्तनेत्रं जयतु विजयते सिद्धिचण्डी नमस्ते ॥ १ ॥

घ्रं घ्रं घ्रं घोररूपं घुघुरितघुरितं घर्घरीनादघोषं
हुं हुं हुं हास्यरूपं त्रिभुवनधरितं खेचरं क्षेत्रपालम् ।
भ्रूं भ्रूं भ्रूं भूतनाथं सकलजनहितं तस्य देहा पिशाचं
हूँ हूँ हूँकारनादैः सकलभयहरं सिद्धिचण्डी नमस्ते ॥ २ ॥

व्रं व्रं व्रं व्योमघोरं भ्रमति भुवनतः सप्तपातालतालं
क्रं क्रं क्रं कामरूपं धधकितधकितं तस्य हस्ते त्रिशूलम् ।
द्रुं द्रुं द्रुं दुर्गरूपं भ्रमति च चरितं तस्य देहस्वरूपं
मं मं मं मन्त्रसिद्धं सकलभयहरं सिद्धिचण्डी नमस्ते ॥ ३ ॥

झं झं झंकाररूपं झमति झमझमा झंझमाना समन्तात्
कं कं कङ्कालधारी धुधुरितधुरितं धुन्धुमारी कुमारी ।
धूं धूं धूं धूम्रवर्णा भ्रमति भुवनतः कालपाशत्रिशूलं
तं तं तं तीव्ररूपं मम भयहरणं सिद्धिचण्डी नमस्ते ॥ ४ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

Caṇḍikā-daṇḍaka-stotram

ॐ namaḥ śrī-Caṇḍikāyai |

ūṃ ūṃ ūṃ ugracaṇḍaṃ cacakitacakitaṃ cañcalā durganetraṃ

*hūṁ hūṁ hūṃ*kārarūpaṃ prahasitavadanaṃ khaḍgapāśān dharantam |

daṃ daṃ daṃ daṇḍapāṇiṃ ḍamaruḍimiḍimāṃ ḍaṇḍamānaṃ bhramantaṃ

bhraṃ bhraṃ bhraṃ bhrāntanetraṃ jayatu vijayate siddhicaṇḍī namas te ||1||

ghraṃ ghraṃ ghraṃ ghorarūpaṃ ghughuritaghuritaṃ ghargharīnādaghoṣaṃ

huṃ huṃ huṃ hāsyarūpaṃ tribhuvanadharitaṃ khecaraṃ kṣetrapālam |

bhrūṃ bhrūṃ bhrūṃ bhūtanāthaṃ sakalajanahitaṃ tasya dehā piśācaṃ

*hūṁ hūṁ hūṁ*kāranādaiḥ sakalabhayaharaṃ siddhicaṇḍī namas te || 2 ||

vraṃ vraṃ vraṃ vyomaghoraṃ bhramati bhuvanataḥ saptapātālatālaṃ

kraṃ kraṃ kraṃ kāmarūpaṃ dhadhakitadhakitaṃ tasya haste triśūlam |

druṃ druṃ druṃ durgarūpaṃ bhramati ca caritaṃ tasya dehasvarūpaṃ

maṃ maṃ maṃ mantrasiddhaṃ sakalabhayaharaṃ siddhicaṇḍī namas te ||3||

*jhaṃ jhaṃ jhaṃ*kārarūpaṃ jhamati jhamajhamā jhaṃjhamānā samantāt

*kaṃ kaṃ kaṁ*kāladhārī dhudhuritadhuritaṃ dhundhumārī kumārī |

dhūṃ dhūṃ dhūṃ dhūmravarṇā bhramati bhuvanataḥ kālapāśatriśūlaṃ

taṃ taṃ taṃ tīvrarūpaṃ mama bhayaharaṇaṃ siddhicaṇḍī namas te || 4 ||

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रं रं रं रायरुद्रं रुरुधितरुधितं दीर्घजिह्वाकरालं
पं पं पं प्रेतरूपं समयविजयिनं सुम्भदम्भे निसुम्भे ।
संग्रामे प्रीतियाते जयतु विजयते सृष्टिसंहारकारी
ह्रीं ह्रीं ह्रींकारनादे भवभयहरणं सिद्धिचण्डी नमस्ते ॥ ५ ॥

हूंकारी कालरुपी नरपिशितमुखा सान्द्ररौद्रारजिह्वे
हूँकारी घोरनादे परमशिरशिखा हारती पिङ्गलाक्षे ।
पङ्के जाताभिजाते चुरु चुरु चुरुते कामिनी काण्डकण्ठे
कङ्काली कालरात्री भगवति वरदे सिद्धिचण्डी नमस्ते ॥ ६ ॥

ष्ट्रीं ष्ट्रीं ष्ट्रींकारनादे त्रिभुवननमिते घोरघोरातिघोरं
कं कं कं कालरूपं घुघुरितघुरितं घुं घुमा बिन्दुरूपी ।
धूं धूं धूं धूम्रवर्णा भ्रमति भुवनतः कालपाशत्रिशूलं
तं तं तं तीव्ररूपं मम भयहरणं सिद्धिचण्डी नमस्ते ॥ ७ ॥

झ्रीं झ्रीं झ्रींकारवृन्दे प्रचरितमहसा वामहस्ते कपालं
खं खं खं खड्गहस्ते डमरुडिमडिमां मुण्डमालासुशोभाम् ।
रुं रुं रुं रुद्रमालाभरणविभूषिता दिर्घजिह्वा कराला
देवि श्री उग्रचण्डी भगवति वरदे सिद्धिचण्डी नमस्ते ॥ ८ ॥

श्रीचण्डिकादण्डकस्तोत्रं समाप्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

raṃ raṃ raṃ rāyarudraṃ rurudhitarudhitaṃ dīrghajihvākarālaṃ

paṃ paṃ paṃ pretarūpaṃ samayavijayinaṃ sumbhadambhe nisumbhe |

saṃgrāme prītiyāte jayatu vijayate sṛṣṭisaṃhārakārī

*hrīṃ hrīṃ hrīṃ*kāranāde bhavabhayaharaṇaṃ siddhicaṇḍī namas te || 5 ||

hūṃkārī kālarupī narapiśitamukhā sāndraraudrārajihve

hūṁkārī ghoranāde paramaśiraśikhā hāratī piṅgalākṣe |

paṅke jātābhijāte curu curu curute kāminī kāṇḍakaṇṭhe

kaṅkālī kālarātrī bhagavati varade siddhicaṇḍī namas te || 6 ||

*ṣṭrīṃ ṣṭrīṃ ṣṭrīṃ*kāranāde tribhuvananamite ghoraghorātighoraṃ

kaṃ kaṃ kaṃ kālarūpaṃ ghughuritaghuritaṃ ghuṃ ghumā bindurūpī |

dhūṃ dhūṃ dhūṃ dhūmravarṇā bhramati bhuvanataḥ kālapāśatriśūlaṃ

taṃ taṃ taṃ tīvrarūpaṃ mama bhayaharaṇaṃ siddhicaṇḍī namas te || 7 ||

*jhrīṃ jhrīṃ jhrīṃ*kāravṛnde pracaritamahasā vāmahaste kapālaṃ

khaṃ khaṃ khaṃ khaḍgahaste ḍamaruḍimaḍimāṃ muṇḍamālāsuśobhām |

ruṃ ruṃ ruṃ rudramālābharaṇavibhūṣitā dirghajihvā karālā

devi śrī ugracaṇḍī bhagavati varade siddhicaṇḍī namas te || 8 ||

Śrī-caṇḍikā-daṇḍaka-stotraṃ samāptam |

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वज्रयोगिनीविशुद्धिस्तोत्रम्*

१ नमः कोलास्यै |

नौमि श्रीवज्रवाराहीं सम्यक्सहजरूपिणीम् |
संवृतिपरमार्थभ्यां वक्रद्वयां नमो ऽस्तु ते || १ ||

सत्यद्वयविशुद्धिभ्यां भुजद्वयसमन्विताम् |
महारागमयीं देहां रक्तवर्णां महोज्ज्वलाम् || २ ||

वामपार्श्वे धृतश्चैव खड्वाङ्गोपायशुद्धितः |
कृपारसामृतैः पूर्णां वामे कपालधारिणीम् || ३ ||

दक्षिणे वज्रकर्त्री च शाश्वतोच्छेदछेदिनीम् |
पञ्चज्ञानमयीं शुद्धां पञ्चमुद्राविभूषिणीम् || ४ ||

नैरात्म्यधर्मगम्भीरे आत्मलीनाच्छवासनीम् |
मायाचक्रस्वभावस्थां चण्डालीदीपकोज्वलाम् || ५ ||

महासुखाभिसंस्थाने हेरुकं हूंकाररूपकम् |
तत्स्थानमूर्द्धगमनां ताण्डवां वज्रयोगिनीम् || ६ ||

मुण्डस्रग्धारिणीमङ्गे आलिकालिविशुद्धिताम् |
अशीतधर्मस्कन्धानां प्रकाशान्मुक्तकेशिकाम् || ७ ||

---

* *हूँकारबज्रकृतं बज्रयोगिनीविशुद्धिस्तोत्रं बद्रीरत्नभाष्यम्* (पूर्वसेवाखलक, ने. सं. ११२१) + आशा सफू कुथि DPN २३३४, ने. सं. ६८९.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

Vajrayoginī-viśuddhi-stotram*

ʔ namaḥ kolāsyai |

naumi śrīvajravārāhīṃ samyaksahajarūpiṇīm |
saṃvṛtiparamārthabhyāṃ vaktradvayāṃ namo 'stu te || 1||

satyadvayaviśuddhibhyāṃ bhujadvayasamanvitām |
mahārāgamayīṃ dehāṃ raktavarṇāṃ mahojjvalām || 2 ||

vāmapārśve dhṛtaś caiva khaṭvāṅgopāyaśuddhitaḥ |
kṛpārasāmṛtaiḥ pūrṇāṃ vāme kapāladhāriṇīm || 3 ||

dakṣiṇe vajrakartrī ca śāśvatocchedachedinīm |
pañcajñānamayīṃ śuddhāṃ pañcamudrāvibhūṣiṇīm || 4 ||

nairātmyadharmagambhīre ātmalīnācchavāsanīm |
māyācakrasvabhāvasthāṃ caṇḍālīdīpakojvalām || 5 ||

mahāsukhābhisaṃsthāne herukaṃ hūṃkārarūpakam |
tatsthānam ūrddhvagamanāṃ tāṇḍavāṃ vajrayoginīṃ ||6||

muṇḍasragdhāriṇīm aṅge ālikālivisuddhitām |
aśītadharmaskandhānāṃ prakāśān muktakeśikām || 7 ||

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पञ्चज्ञानमयं वज्रं तन्मध्ये शीर्षधारिणीम् ।
चतुर्मारविनाशार्थे कोलाननं सुभीषणाम् ॥ ८ ॥

रक्तवर्तुलत्रिनेत्रां त्रिकायपरिशुद्धिताम् ।
त्रिकोणोपरिसंस्थानां सर्वज्ञज्ञानगोचराम् ॥ ९ ॥

यदा प्राप्तं मया पुण्यं योगिनीस्तुतिराजकाम् ।
तेन पुण्येन लोको ऽयं वज्रयोगिनीं तां गतः ॥ १० ॥

शुभं भवतु लोकानां वज्रयोगिनीस्तोत्रकम् ।
ते पठन्ति सदा सर्वे तेन यायात्सुखावतीम् ॥ ११ ॥

वज्रयोगिनीविशुद्धिस्तोत्रं समाप्तम् ।
कृतिरियं हूँकारवज्रानाम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

pañcajñānamayaṃ vajraṃ tanmadhye śīrṣadhāriṇīm |
caturmāravināśārthe kolānanaṃ subhīṣaṇām || 8 ||

raktavartulatrinetrāṃ trikāyapariśuddhitām |
trikoṇoparisaṃsthānāṃ sarvajñajñānagocarām || 9 ||

yadā prāptaṃ mayā puṇyaṃ yoginīstutirājakām |
tena puṇyena loko 'yaṃ vajrayoginīṃ tāṃ gataḥ || 10 ||

śubhaṃ bhavatu lokānāṃ vajrayoginīstotrakam |
te paṭhanti sadā sarve tena yāyāt sukhāvatīm || 11 ||

Vajrayoginī-viśuddhi-stotraṃ samāptam |
kṛtir iyaṃ Hūṁkāravajrānām ||

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीवज्रवाराहीद्वादशकम्

१ नमः श्रीवज्रवाराह्यै ।

रक्ताङ्गीं वज्रवाराहीं दिव्यरूपीं सुरूपिणीम् ।
कान्तिमूर्तीं देयादेवीं नमामि वज्रयोगिनीम् ॥ १ ॥

बन्धुपुष्पसंकाशां शान्तरूपीं जिनेश्वरीं ।
ऋद्धिसिद्धिप्रदादेवीं नमामि वज्रयोगिनीम् ॥ २ ॥

द्वादशवर्षसंपन्नां नवनृत्यस्वरूपिणीम् ।
त्रैलोक्यव्यापिनीं देवीं नमामि वज्रयोगिनीम् ॥ ३ ॥

नग्नाङ्गां मुक्तकेशीं च संसारक्षेत्रवासिनीम् ।
त्रिनेत्रां विश्ववर्णां च नमामि वज्रयोगिनीम् ॥ ४ ॥

प्रभुदेवहेरुकेश-सहनृत्यवरप्रदाम् ।
कर्तिकपालधारीं च नमामि वज्रयोगिनीम् ॥ ५ ॥

खड्वाङ्गव्योमसंकाशां मोहिनीं विश्वमातरम् ।
भुक्तिमुखिप्रदादेवीं नमामि वज्रयोगिनीम् ॥ ६ ॥

शुष्कमालाधरादेवीं पञ्चमुद्राविभूषिताम् ।
हाडाभरणनौपूरां नमामि वज्रयोगिनीम् ॥ ७ ॥

वामभुजकपालां च दक्षिभुजकर्तिकाम् ।
कोलमुखधरा देवीं नमामि वज्रयोगिनीम् ॥ ८ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

Śrī-vajravārāhī-dvādaśakam

ʔ namaḥ śrī-Vajravārāhyai |

raktāṅgīṃ vajravārāhīṃ divyarūpīṃ surūpiṇīm |
kāntimūrtīṃ deyādevīṃ namāmi vajrayoginīm || 1 ||

bandhupuṣpasaṃkāśāṃ śāntarūpīṃ jineśvarīṃ |
ṛddhisiddhipradādevīṃ namāmi vajrayoginīm || 2 ||

dvādaśavarṣasaṃpannāṃ navanṛtyasvarūpiṇīm |
trailokyavyāpinīṃ devīṃ namāmi vajrayoginīm || 3 ||

nagnāṅgāṃ muktakeśīṃ ca saṃsārakṣetravāsinīm |
trinetrāṃ viśvavarṇāṃ ca namāmi vajrayoginīm || 4 ||

prabhudevaherukeśa-sahanṛtyavarapradām |
kartikapāladhārīṃ ca namāmi vajrayoginīm || 5 ||

khaṭvāṅgavyomasaṃkāśāṃ mohinīṃ viśvamātaram |
bhuktimukhipradādevīṃ namāmi vajrayoginīm || 6 ||

śuṣkamālādharādevīṃ pañcamudrāvibhūṣitām |
hāḍābharaṇanaupūrāṃ namāmi vajrayoginīm || 7 ||

vāmabhujakapālāṃ ca dakṣibhujakartikām |
kolamukhadharā devīṃ namāmi vajrayoginīm || 8 ||

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूर्यमण्डलमध्यस्थां कीरीटमुकुटोज्वलाम् ।
त्रैलोक्यमातरं देवीं नमामि वज्रयोगिनीम् ॥ ९ ॥

सर्वपापहरादेवीं सर्वदुःखविनाशिनीम् ।
महामोक्षप्रदा देवीं नमामि वज्रयोगिनीम् ॥ १० ॥

सर्वशत्रुप्रमर्दिनीं सर्वमारविमर्दनीम् ।
सर्वव्याधिनिहन्तारीं नमामि वज्रयोगिनीम् ॥ ११ ॥

एकवक्त्रां सवारूढां द्विभुजां सूर्यमण्डले ।
पादाङ्गष्ठस्थितां देवीं नमामि वज्रयोगिनीम् ॥ १२ ॥

श्रीवज्रवाराहीद्वादशस्तुति समाप्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

sūryamaṇḍalamadhyasthāṃ kīrīṭamukuṭojvalām |
trailokyamātaraṃ devīṃ namāmi vajrayoginīm || 9 ||

sarvapāpaharādevīṃ sarvaduḥkhavināśinīm |
mahāmokṣapradā devīṃ namāmi vajrayoginīm || 10 ||

sarvaśatrupramardinīṃ sarvamāravimardanīm |
sarvavyādhinihantārīṃ namāmi vajrayoginīm || 11 ||

ekavaktrāṃ savārūḍhāṃ dvibhujāṃ sūryamaṇḍale |
pādāṅgaṣṭhasthitāṃ devīṃ namāmi vajrayoginīm || 12 ||

śrī-Vajravārāhī-dvādaśa-stuti samāptam |

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection